**सुन्दरकाण्ड त्रयस्त्रिंशः सर्गः (३३) - ॥ हनूमज्जानकीसंवादोपक्रमः ॥**

सोऽवतीर्य द्रुमात् तस्माद् विद्रुम प्रतिमाननः ।
विनीत वेषः कृपणः प्रणिपत्योप सृत्य च ॥ १ ॥

तामब्रवीन् महातेजा हनूमान् मारुतात्मजः ।
शिरस्यञ्जलि माधाय सीतां मधुरया गिरा ॥ २ ॥

का नु पद्म पलाशाक्षि क्लिष्ट कौशेय वासिनि ।
द्रुमस्य शाखा मालम्ब्य तिष्ठसि त्वमनिन्दिते ॥ ३ ॥

किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम् ।
पुण्डरीक पलाशाभ्यां विप्रकीर्ण मिवोदकम् ॥ ४ ॥

सुराणा मसुराणां वा नाग गन्धर्व रक्षसाम् ।
यक्षाणां किन्नराणां वा का त्वं भवसि शोभने ॥ ५ ॥

का त्वं भवसि रुद्राणां मरुतां वा वरानने ।
वसूनां वा वरारोहे देवता प्रतिभासि मे ॥ ६ ॥

किं नु चन्द्रमसा हीना पतिता विबुधालयात् ।
रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठा सर्वगुणान्विता ॥ ७ ॥

का त्वं भवसि कल्याणि त्वमनिन्दितलोचने ।
कोपाद्वा यदि वा मोहाद्भर्तार मसितेक्षणे ॥ ८ ॥

वसिष्ठं कोपयित्वा त्वं नासि कल्याण् यरुन्धती ।
को नु पुत्रः पिता भ्राता भर्ता वा ते सुमध्यमे ॥ ९ ॥

अस्माल् लोका दमुं लोकं गतं त्वमनु शोचसि ।
रोदनादति निःश्वासाद् भूमि संस्पर्शना दपि ॥ १० ॥

न त्वां देवीमहं मन्ये राज्ञः सञ्ज्ञाव धारणात् ।
व्यञ्जनानि च ते यानि लक्षणानि च लक्षये ॥ ११ ॥

महिषी भूमि पालस्य राज कन्याऽसि मे मता ।
रावणेन जनस्थानाद् बला दपहृता यदि ॥ १२ ॥

सीता त्वमसि भद्रं ते तन्म माचक्ष्व पृच्छतः ।
यथा हि तव वै दैन्यं रूपं चाप्यति मानुषम् ॥ १३ ॥

तपसा चान्वितो वेषस् त्वं राम महिषी ध्रुवम् ।
सा तस्य वचनं श्रुत्वा राम कीर्तन हर्षिता ॥ १४ ॥

उवाच वाक्यं वैदेही हनुमन्तं द्रुमाश्रितम् ।
पृथिव्यां राज सिंहानां मुख्यस्य विदितात्मनः ॥ १५ ॥

स्नुषा दशरथस् याहं शत्रु सैन्य प्रतापिनः ।
दुहिता जनकस्याहं वैदेहस्य महात्मनः ॥ १६ ॥

सीता च नाम नाम्नाहं भार्या रामस्य धीमतः ।
समा द्वादश तत्राहं राघवस्य निवेशने ॥ १७ ॥

भुञ्जाना मानुषान् भोगान् सर्व काम समृद्धिनी ।
तत्र त्रयोदशे वर्षे राज्ये नेक्ष्वाकु नन्दनम् ॥ १८ ॥

अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ।
तस्मिन्सम्भ्रियमाणे तु राघवस् याभिषेचने ॥ १९ ॥

कैकेयी नाम भर्तारं देवी वचन मब्रवीत् ।
न पिबेयं न खादेयं प्रत्यहं मम भोजनम् ॥ २० ॥

एष मे जीवितस्यान्तो रामो यद्यभि षिच्यते ।
यत्तदुक्तं त्वया वाक्यं प्रीत्या नृपति सत्तम ॥ २१ ॥

तच्चेन्न वितथं कार्यं वनं गच्छतु राघवः ।
स राजा सत्यवाग् देव्या वरदान मनुस्मरन् ॥ २२ ॥

मुमोह वचनं श्रुत्वा कैकेय्याः क्रूर मप्रियम् ।
ततस्तु स्थविरो राजा सत्ये धर्मे व्यवस्थितः ॥ २३ ॥

ज्येष्ठं यशस्विनं पुत्रं रुदन् राज्य मयाचत ।
स पितुर् वचनं श्रीमा नभिषेकात् परं प्रियम् ॥ २४ ॥

मनसा पूर्वमासाद्य वाचा प्रति गृहीतवान् ।
दद्यान्न प्रति गृह्णीयान्न ब्रूयत् किञ्चि दप्रियम् ॥ २५ ॥

अपि जीवित हेतोर्वा रामः सत्य पराक्रमः ।
स विहायोत्तरी याणि महार्हाणि महायशाः ॥ २६ ॥

विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ।
साऽहं तस्याग्रतस् तूर्णं प्रस्थिता वनचारिणी ॥ २७ ॥

न हि मे तेन हीनाया वासः स्वर्गेऽपि रोचते ।
प्रागेव तु महाभागः सौमित्रिर् मित्र नन्दनः ॥ २८ ॥

पूर्वजस् यानु यात्रार्थे द्रुम चीरै रलङ्कृतः ।
ते वयं भर्तु रादेशं बहुमान्य दृढव्रताः ॥ २९ ॥

प्रविष्टाः स्म पुराद्दष्टं वनं गम् भीर दर्शनम् ।
वसतो दण्डकारण्ये तस्याह ममितौजसः ॥ ३० ॥

रक्षसाऽपहृता भार्या रावणेन दुरात्मना ।
द्वौ मासौ तेन मे कालो जीविताानुग्रहः कृतः ।
ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितम् ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥